B.A. 2nd Semester (Honours) Examination, 2022

SANSKRIT

Course ID: 20912 Course Code:AHSNS/202C-4

[Classical Sanskrit Literature (Drama)]

Time: 2 Hours Full Marks: 40

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own wordsas far as practicable.*

**1. अधोलिखितेषु प्रश्नेषु एकस्य उत्तरं प्रदेयम्।** **10×1=10**

क) अभिज्ञानशकुन्तलमिति नाटके अनसूयाप्रियंवदयोः चरितस्य तुलनात्मकालोचना क्रियताम्।

ख) अभिज्ञानशकुन्तलमिति नाटकस्य प्रथमाङ्के हस्तिप्रवेशस्य नाटकीयतात्पर्यम् आलोच्यताम्।

ग) स्वप्नवासवदत्तमिति नाटके ब्रह्मचारिवृत्तं सप्रयोजनं व्याख्यायताम्।

**2. यथेच्छं श्लोकस्य एकस्य सुरगिरा देवनागरीलिप्या च सप्रसङ्गव्याख्या कार्या।** **5×1=5**

क) सरसिजमनुबिद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।

ख) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा।।

**3. यथेच्छं श्लोकस्य एकस्य सुरगिरा देवनागरीलिप्या च सप्रसङ्गव्याख्या कार्या।** **5×1=5**

क) सुखमर्थो भवेद्दातुं सुखं प्राणाः सुखं तपः।

सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम्।।

ख) कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति।

एवं लोकस्तुल्यधर्मा वनानां काले काले छिद्यते रुह्यते च।।

**4. द्वयोः कयोश्चिदेकस्य सुरगिरा देवनागरीलिप्या च भावसम्प्रसारणं कार्यम्।** **5×1=5**

क) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः।

ख) प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते।

**5. यथेच्छं पञ्चानां प्रश्नानाम् उत्तरं सुरगिरा देवनागरीलिप्या च लेख्यम्।** **1×5=5**

क) शिक्षितानामात्मन्यप्रत्ययम् इत्यस्य पदस्य सन्धिविच्छेदः करणीयः।

ख) संप्रेष्य इति पदे का व्युत्पत्तिः?

ग) हिमांशोः इति पदे को नाम समासः?

घ) भुज्यते इति पदस्य का व्युत्पत्तिः?

ङ) वल्कलेन इति पदे सकारणकारकविभक्तिः निरूपणीया ।

च) वनानाम् इति पदे सकारणकारकविभक्तिः निरूपणीया।

छ) मृत्युकाले इत्यत्र को नाम समासः?

6. **अधोलिखितेषु प्रश्नेषु पञ्च लघुप्रश्नाः समाधेयाः। तेषु द्वयोः उत्तरं अवश्यमेव सुरगिरा देवनागरीलिप्या च लेख्यम्।** 2×5=10

क) अभिज्ञानशकुन्तलमिति नाटके दुर्वाससः अभिशापवाक्यं लिख्यताम्।

ख) भद्रे साधारणोऽयं प्रणयः- इत्यत्र वक्ता कः? कस्मिन् प्रसङ्गे इदमुक्तम् ?

ग) न प्रभातरलं ज्योतिरुदेति वसुधातलात् – व्याख्यायताम्।

घ) को नाम मातलिः? दुष्यन्तसकाशे तेन का वार्ता आनीता?

ङ) महासेनः कः? का वा अङ्गारवती?

च) किमर्थं पद्मावती मगधराज्योपान्तस्थं तपोवनम् आगतवती?

छ) इह मां निक्षेप्तुकामः आर्यः यौगन्धरायणः -अत्र वक्ता कः? कस्मिन् प्रसङ्गे इदमुक्तम् ?